NJESR/December – 2022/Volume – 4/Issue -12 E-ISSN-2582-5836

DOI-10.53571/NJESR.2022.4.12.28-31

# साम्प्रदायिकविवादनिराकरणार्थं वैदिकदर्शनस्योपादेयता

डॉ.आदित्यनारायणदाशः, संस्कृतविभागः, अध्यापकः,

केन्द्रीयविश्वविद्यालयः, ओडिशा

**(Received:10November2022/Revised:20November2022/Accepted:30November2022/Published:16December2022)**

मृत्तिकायां जलसंयोगे मृत्तिका यथा निर्द्दिष्टाकारं धारयति एवं कुम्भकारस्य संयोगे घटादयः सञ्जायन्ते। तदनुरूपं मनुष्यः पित्रोः संयोगे कुलं, जीविकावसात् उच्चनीच्चस्य भेदम् एवं अज्ञानवशात् धर्मस्य विविधताम् आप्नोति। फलतः विश्वः सत्यान्वेषकाचिन्तनस्य दार्शनिकदिशं विहाय सत्याभासमिथ्याभ्रमजालेषु अटति। परिणामस्वरूपं हिन्दु-यवन-ख्रीष्ट-बौद्ध-जैनादिविविधेषु धर्मेषु सर्जनात्मकप्रवृत्तिः एवं चिन्तनात्मकाभिनवदृष्टिः क्रमशः ह्रासोन्मुखीं गच्छति। शिक्षाराजनीतिसामाजिकक्षेत्रेष्वपि तदनुरूपं प्रतिभाति। अतः समग्रविश्वे आतङ्कवादः, सीमाविवादः, साम्प्रदायीकधार्मिकवादश्च परिदृश्यते। फलतः समग्रविश्वः ध्वंसाभिमुखं गच्छति। अतः विश्वस्य मुखपरिवर्तनाय कल्याणाय च दर्शनशास्त्राणाम् आवश्यकता अनिर्वार्यम्। दर्शनमिति श्रवणसमनन्तरं मनसि जिज्ञासा जायते किं नाम दर्शनम् ?

उच्यते सत्यान्वेषणं विचारश्चैव दर्शनम्। अभिप्रायः यत् विचारः चक्रवत् परिभ्रमति तत्र गन्तव्यस्थानं नास्ति। अर्थात् विचारैः विविधानि मतानि निःसरन्ति। परन्तु मतं सत्यञ्च उभौ भिन्नौ स्तः। अतः विविधेषु मतेषु सत्यान्वेषणमेव दर्शनम्। कारणं यत् मतमेकं बौद्धिकक्रियामात्रम्। परन्तु सत्यं समग्रविश्वस्य अनुभवः। सत्यं सार्वभौमं सनातनं चास्ति। अतः सर्वभौमं सनातनं विचारपूर्वकसत्यान्वेषणमेव दर्शनमिति सिद्धान्तः। इत्थमुच्यते दृश्यते ज्ञायते विचार्यते परमतत्त्वम् अनेन इति। अत्र परमतत्त्वमिति शब्दस्यार्थः सत्यम्। अतः दर्शनशास्त्राणां विषयः सत्यान्वेषणम्।

कालक्रमे कालकवलितजनाः स्वस्वार्थसाधनाय वैदिकदर्शनस्य भिन्नं भिन्नं रूपं दर्शितवन्तः। दर्शनशास्त्रमपि कालेन कवलितं भूत्वा मलिनं दूषितं च अभवत्। परन्तु समग्रविश्वस्य चिन्तनं दर्शनं च वेदे निहितं दृश्यते। मूढैः वेदस्यार्थः विविधरूपेण प्रतिपादितः। पुनश्च कैश्चन स्वस्य कपोलकल्पितमतानि वेदवाक्यानि इव उपस्थापितानि। परन्तु तत्र कापि सत्यता नास्ति। अधुना विचार्यविषयः यत् विश्वनिधिवेदस्य उपयुक्तार्थः कः ? आधुनिकसमाजे एतस्य का आवश्यकता, किं वा तस्य प्रयोजनम् ?

उच्यते उत्तमसमाजनिर्माणे परिवर्तने च वेदस्य महती प्रासङ्गिकता संलक्ष्यते। अतः वैदिकदर्शनेषु विद्यमानानामाधुनिकसमाजपरिवर्तनतत्त्वानामत्र स्थालीपुलाकन्यायेन प्रस्तुयते।

सर्वप्राचीनार्वाचीनोऽपि ज्ञाननिधिवेदः। प्रतियुगं यथा जीवनाय खाद्यम्, तथैव वेदस्यापि प्रासङ्गिकता। अतः समग्विश्वस्य निधिः मेरूदण्डश्च वेद उच्यते। समग्रविश्वस्य समस्तक्षेत्रेषु वेदस्य भूमिका महत्त्वपूर्णा वर्तते। धार्मिक-सामाजिक-शिक्षा-विज्ञानादिषु क्षेत्रेषु वैदिकदर्शनस्य प्रासङ्गिकता अस्ति इति नास्ति संशयः।

अधुनातनसमाजे धर्मः इति शब्दस्य परिभाषा काचित् भिन्ना वर्तते। अर्थात् हिन्दु-मुसलमान्-सिख्-ख्रीष्टियान्-बौद्धादि विविधैः नामैः जनगोष्टिसमूह एव धर्मः। फलतः सङ्कीर्णमनाः जनाः विवादेन सङ्घर्षेण कलहेन मतभेदेन जीवन्ति। कपोलकल्पितशास्त्राणामध्ययनं कृत्वा धर्मस्य विभाजनं कुर्वन्ति। परन्तु वैदिकदर्शनानुशारं धर्मस्य संज्ञा  एतेषु काचित् भिन्नास्ति। समग्रे विश्वे मानव-पशु-विहङ्ग-वृक्षकीटपतङ्गः निवसन्ति। अतः मनुष्याणां मनुष्यत्वं, पशुनां पशुत्वं, विहङ्गानां विहङ्गत्वं, वक्षाणां वृक्षत्वं, कीटपतङ्गानां कीटपतङ्गत्वमेव धर्मः। अतः उच्यते "धारणाद्धर्म इत्याहुः धर्मो धारयति प्रजा।[1]" अर्थात् यदा मनुष्यः मनु,यत्वं विहाय पशुवत् आचरति तदा सः धर्मभ्रष्टो भवति। अतः मनुष्यत्वरूपेण मनुष्यान् धारयति एवं पशुत्वं मर्जयतीति धर्मः। समग्रविश्वे मानवानामेक एव धर्मः मानवत्वं मनवधर्मः वा इति सिद्धान्तः। पं.मधुसुदनशर्मामतानुसारं -

"सा नूनं सांसिद्धिकी यस्या आश्रयः कदापि न व्यभिचरति। तैजसपरमाणवो गतिस्वभावास्तेषु निमित्तसापेक्षा स्थितिर्भवति, स्थितिहेत्वपगमे स्वत एव गतिः प्रवर्तते, सा सांसिद्धिकी।....सांसिद्धिक्याः सर्वविधाया एव धर्मशब्देन व्यवहारः - तेन तेन धर्म्मिणा नित्यं ध्रियमाणत्वात् तत्तद्वस्तुस्वरूपधारणकारणत्वाच्च।[2]" अनन्तरमुक्तं यत् - यज्ञः सर्वसाधारणो धर्मः। अर्थादत्र  यज्ञः धर्मस्य मूलतत्त्वमिति प्रतिभाति। समग्र विश्ववासिभिः यज्ञ करणीय इति। अतः अत्र वेदे यज्ञशब्दस्य कस्मिन् अर्थे व्यवहार इति जिज्ञासायाम् उच्यते, अग्नेः सोमस्याहुतिः, येन संस्कारः जायते। अतः प्रपञ्चे अस्मिन् यत् किमपि परिदृश्यते अग्नेः सोमाहुतिः मात्रम्। भोजनमध्ययनमध्यापनमादयः तानि सर्वाणि यज्ञ इति उच्यते। मातृगर्भे अपि गर्भाग्नेः शुक्रस्य, जठराग्नेः अन्नस्य च आहुतिकाणात् उत्पन्नवस्तुः अग्नेः साध्यक्रियाकलापः यज्ञ उच्यते। अतः यज्ञः सार्वजनीनः सनातनः सर्वसाधारणो भवति। अतः पण्डितमधुसूदनशर्ममहोदयेनोक्तं यत्- "यज्ञः सर्वसाधारणो धर्मः। यच्च किञ्चिदिदं दृश्यते तत् सर्वमग्नौ सोमाहुतिर्भवतीति जगत्प्रवर्तत। यद् भुङ्क्ते यदध्यापयति यद्वा किञ्च करोति स सर्वो यज्ञः, यच्चेदं राज्ञां राज्यं प्रतिपति राजनि वा प्रजानां करप्रत्यर्पणं स सर्वो यज्ञः। स्त्रीगर्भाग्नौ रेत आहूयते। यच्च किञ्चिचिदिहाग्निद्वारा वस्तूत्पाद्यते स सर्वोऽप्यग्निसाध्यः कर्मकलापो यज्ञः। यज्ञो हि श्रेष्ठतमं कर्म, सर्वेषामेव कर्मणामन्ततस्तत्रैव अन्तर्भावात्।[3]"

अतः गीतायामपि उच्यते -

"सहयज्ञाः प्रजाः सृष्ट्वा पुरोवाच प्रजापतिः। अनेन प्रसविष्यध्वमेष वोऽस्त्विष्टकामधुक्।।[4]"

वस्तुतः स्पषं यत् मनुष्याणां कर्तव्याः जीवनशैली एव यज्ञः। अतः यज्ञाय कर्म करणीयं न तु स्वार्थाय। यः स्वार्थाय कर्म करोति सः जननमर्णक्रियायां कर्मबन्धने पतति। अतः उच्यते -

"यज्ञार्थात् कर्मणोऽन्यत्र लोकोऽयं कर्मबन्धनः। तदर्थं कर्म कौन्तेय मुक्तसङ्गः समाचर।।[5]"

विचारात् ज्ञायते यत् मनुष्यः यदा मनुष्यवत् आचरति तदा सः स्वधर्मे तिष्ठति। मनुष्यवदाचरणस्य को अभिप्रायः इति जिज्ञास्य विषयोपरि मनुना उक्तम् -

"धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः। धीर्विद्या सत्यमक्रोधो दशकं धर्मलक्षणम्।।[6]"

तत्र

1. सन्तोषो धृतिः।

2. परेणापकारे कृते तं प्रत्यपकारानाचरणं क्षमा।

3. विकारहेतुविषयसन्निधानेऽप्यविक्रियत्वं मनसो दमः, मनोसो दमनं दमः।

4. अन्यायेन छलेन च परधनादि ग्रहणं स्तेयः। स्तेयस्याभाव अस्तेयः।

5. यथाशास्त्रं मृज्जलाभ्यां देहशोधनं शौचम्। जलमृतिकादिभिः वस्त्रशरीरादिषु मलस्य शोधनं, ततः न्यायपूर्वकं विविधेषु आश्रमेषु शुद्धान्नजलादिग्रहणं, जपतपादिभिः अन्तःकरणादिशुद्धिकरणं शौजमुच्यते।

6. विषयेभ्यः चक्षुरादिवारणमिन्द्रियनिग्रहः।

7. शास्त्रादितत्त्वज्ञानं धीः।

8. आत्मज्ञानं विद्या

9. यथार्थाभिधानं सत्यम्।

10. क्रोधहेतौ सत्यपि क्रोधानुत्पत्तिः अक्रोधः।

अधुनातनसमाजे धर्मचारस्य मिथ्याडम्बरः प्रचलति। फलतः हिन्दु-मुसलमान-खीष्टियान-बुद्ध इति विविधेषु गोष्ठिषु साम्प्रदायिकविवादः गोष्ठिकन्दलः नरसंहारश्च प्रचलति। येन धर्मस्य धार्मिकता नष्टा भवति। अतः मानवानां मानवत्वं परिप्रकाशनाय विश्वे सर्वधर्मसमन्वयाय मानवधर्मस्य स्थापनाय समाजकल्याणाय आधुनिकयुगे वैदिकदर्शनस्य आवश्यकता अस्ति। येन सकलविवादानां निराकणं भविष्यति नास्ति तत्र शङ्का।

सन्दर्भाः -

1. वैदिकवाङ्मयविवेचनम्-पृ.सं.324

2. वेदधर्मव्याख्यानम्-भाग1-पृ.सं.18-19

3. वैदिकवाङ्मयविवेचनम् -पृ.सं.342

4. श्रीमद्भगवद्गीता -3/4

5. श्रीमद्भगवद्गीता - 3/9

6. मनु- 6/92